শ্রীঃ
শ্রীমতে রামানুজায নমঃ
শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীশঙ্করাচার্য ৱিরচিতম্

# ॥ শ্রীগোৱিন্দাষ্টকম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রীগোৱিন্দাষ্টকম্ ॥

সত্যং জ্ঞানমনন্তং নিত্যমনাকাশং পরমাকাশং
গোষ্ঠপ্রাঙ্গণরিঙ্গণলোলমনাযাসং পরমাযাসম্।
মাযাকল্পিতনানাকারমনাকারং ভুৱনাকারং
ক্ষ্মামানাথমনাথং প্রণমত গোৱিন্দং পরমানন্দম্॥ **1** ॥

মৃৎস্নামৎসীহেতি যশোদাতাডনশৈশৱ সন্ত্রাসং
ৱ্যাদিতৱক্ত্রালোকিতলোকালোকচতুর্দশলোকালিম্।
লোকত্রযপুরমূলস্তংভং লোকালোকমনালোকং
লোকেশং পরমেশং প্রণমত গোৱিন্দং পরমানন্দম্॥ **2** ॥

ত্রৈৱিষ্টপরিপুৱীরঘ্নং ক্ষিতিভারঘ্নং ভৱরোগঘ্নং
কৈৱল্যং নৱনীতাহারমনাহারং ভুৱনাহারম্।
ৱৈমল্যস্ফুটচেতোৱৃত্তিৱিশেষাভাসমনাভাসম্
শৈৱং কেৱলশান্তং প্রণমত গোৱিন্দং পরমানন্দম্॥ **3** ॥

গোপালং ভূলীলাৱিগ্রহগোপালং কুলগোপালং
গোপীখেলনগোৱর্ধনধৃতিলীলালালিতগোপালম্।
গোভির্নিগদিত গোৱিন্দস্ফুটনামানং বহুনামানং
গোপীগোচরদূরং প্রণমত গোৱিন্দং পরমানন্দম্॥ **4** ॥

গোপীমণ্ডলগোষ্ঠীভেদং ভেদাৱস্থমভেদাভং
শশ্ৱদ্গোখুরনির্ধূতোৎকৃতধূলীধূসরসৌভাগ্যম্।
শ্রদ্ধাভক্তিগৃহীতানন্দমচিন্ত্যং চিন্তিতসদ্ভাৱং
চিন্তামণিমহিমানং প্রণমত গোৱিন্দং পরমানন্দম্॥ **5** ॥

স্নানৱ্যাকুলযোষিদ্বস্ত্রমুপাদায়াগমুপারূঢং
    ৱ্যাদিৎসন্তীরথ দিগ্বস্ত্রা দাতুমুপাকর্ষন্তম্ তাঃ।
নির্ধূতদ্বয়শোকৱিমোহং বুদ্ধং বুদ্ধেরন্তস্স্থং
    সত্তামাত্রশরীরং প্রণমত গোৱিন্দং পরমানন্দম্॥ **6**॥

কান্তং কারণকারণমাদিমনাদিং কালমনাভাসং
    কালিন্দীগতকালিযশিরসি মুহুর্নৃত্যন্তং সুনৃত্যন্তম্।
কালং কালকলাতীতং কলিতাশেষং কলিদোষঘ্নং
    কালত্রযগতিহেতুং প্রণমত গোৱিন্দং পরমানন্দম্॥ **7**॥

বৃন্দাৱনভুৱি বৃন্দারকগণবৃন্দারাধ্যং ৱন্দেঽহং
    কুন্দাভামলমন্দস্মেরসুধানন্দং সুহৃদানন্দম্।
ৱন্দ্যাশেষমহামুনিমানসৱন্দ্যানন্দপদদ্বন্দ্বং
    ৱন্দ্যাশেষগুণাব্ধিং প্রণমত গোৱিন্দং পরমানন্দম্॥ **8**॥

গোৱিন্দাষ্টকমেতদধীতে গোৱিন্দার্পিতচেতা যো
    গোৱিন্দাচ্যুত মাধৱ ৱিষ্ণো গোকুলনাযক কৃষ্ণেতি।
গোৱিন্দাঙ্ঘ্রিসরোজধ্যানসুধাজলধৌতসমস্তাঘো
    গোৱিন্দং পরমানন্দামৃতমন্তস্স্থং স সমভ্যেতি॥ **9**॥

॥ ইতি শ্রীগোৱিন্দাষ্টকং সমাপ্তম্॥